श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते चतुर्थस्कन्धे

# ॥ ध्रुवस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ ध्रुवस्तुतिः ॥

ध्रुव उवाच

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
    सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
    प्राणान्नमो भगवते पुरुषाय तुभ्यम्॥ 1 ॥

एकस्त्वमेव भगवन्निदमात्मशक्त्या
    मायाख्ययोरुगुणया महदाद्यशेषम्।
सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु
    नानेव दारुषु विभावसुवद्विभासि॥ 2 ॥

त्वद्दत्तया वयुनयेदमचष्ट विश्वं
    सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः।
तस्यापवर्ग्यशरणं तव पादमूलं
    विस्मर्यते कृतविदा कथमार्तबन्धो॥ 3 ॥

नूनं विमुष्टमतयस्तव मायया ते
    ये त्वां भवाप्ययविमोक्षणमन्यहेतोः।
अर्चन्ति कल्पकतरुं कुणपोपभोग्यम्
    इच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम्॥ 4 ॥

या निर्वृतिस्तनुभृतां तव पादपद्म -
    ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।

सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
    किं त्वन्तकासिलुलितात् पततां विमानात्॥ 5॥

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
    भूयादनन्त महताममलाशयानाम्।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं
    नेष्ये भवद्गुणकथामृतपानमत्तः॥ 6॥

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं
    ये चान्वदः सुतसुहृद्गृहवित्तदाराः।
ये त्वब्जनाभ भवदीयपदारविन्द -
    सौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः॥ 7॥

तिर्यङ्गगद्विजसरीसृपदेवदैत्य -
    मर्त्यादिभिः परिचितं सदसद्विशेषम्।
रूपं स्थविष्ठमज ते महदाद्यनेकं
    नातः परं परम वेद्मि न यत्र वादः॥ 8॥

कल्पान्त एतदखिलं जठरेण गृह्णन्
    शेते पुमान् स्वदृगनन्तसखस्तदङ्के।
यन्नाभिसिन्धुरुहकाञ्चनलोकपद्म -
    गर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै॥ 9॥

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा
    कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः।
यद्बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या
    द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से॥ 10॥

यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति
    विद्यादयो विविधशक्तय आनुपूर्व्यात्।
तद्ब्रह्म विश्वभवमेकमनन्तमाद्यम्
    आनन्दमात्रमविकारमहं प्रपद्ये॥ **11** ॥

सत्याऽऽशिषो हि भगवंस्तव पादपद्मम्
    आशीस्तथानुभजतः पुरुषार्थमूर्तेः।
अप्येवमर्य भगवान् परिपाति दीनान्
    वाश्रेव वत्सकमनुग्रहकातरोऽस्मान्॥ **12** ॥

॥ इति ध्रुवस्तुतिः समाप्ता ॥